Shri Raghunath Temple MSS. Library,
JAMMU

No. ५५८-घ

Title राधाविनोद काव्य व्याख्या

Author नारायण पण्डितः

Extent ८ Age

Subject काव्यम्

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

राधाविनोदः सटीकः

५५७

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

रघुविनोद

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ॐ श्रीलक्ष्मीनृसिंहाय नमः पितृवचनमवश्यमेव मान्यं जगति जनैरिति शासितुं वनान्तम् गतोमिव करुणारसार्द्रचि-
त्तं रघुमपि कं चिदुपास्महे सततं १ रंगनाथांगजनुषा नारायणमनीषिणा राघवविनोदकाव्यस्य व्याख्या व्याख्यापयिष्य-
ते २ राघवविनोदकाव्यं चिकीर्षुर्विघ्नविध्वंसकाम्यो रामचन्द्रकविः परमेश्वरकर्तृकस्वसंरक्षणाशंसनरूपमंग- रामः
मालीनइति लमाचरति वनमालीवनमाली आपदलं विनीमालातद्वान् जगदीश्वराः नोस्मान् ग्रंथकर्तॄन् श्रोतॄंश्चावतु र-
क्षतु कीदृशः मालीनः मालक्ष्मीः मालीनां दुष्टसंहरणसंभावनं लक्ष्मीभूयवर्त्तमानायस्मिन् स तादृशः पुनः ०

रा·वि·टी· ॐ नमः कृष्णाय मालीनो वनमाली मालीनो वनमाली मालीनो वनमाली मालीनोवतु माली १

१ वनमाली वने जले मालते शोभते स तादृशः जलशोभेत्यर्थः समुद्रशायित्वात् पुनः ० मालीनः मा।
लीनः मालापुष्पस्रजस्ता विद्यन्ते येषां ते मालिनः स्रग्विणो गोपास्तेषामिनः स्वामीति पुनः इनः सूर्यप्रकाश-
कत्वेन सूर्य इति रूपकं वा पुनः ० अवनमाली अवनेन जगत्संरक्षणेन मालते शोभते स तादृशः यद्वा वने राम
वृक्षसमूहे मालते शोभते स तादृशः पुनः ० मालीनः मालं ते शोभन्ते मालिनः इंद्रादयोस्तेषामिनः स्वा- १
मी पुनः ० माली मालापुष्पस्रजस्ता विद्यन्ते यस्य स तादृशः अत एव माली शोभमानः १ श्रीकृष्णाय नमः ॐ न

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

श्री लि

कार्य्यार्थमुपक्षिपति विधुसुहृदिति विधोः सुहृत्स्वरूपं वदनं यस्याः सा विधुसुहृद्वदना राधा, सखीप्रति विधोः सुहृदस्तद्
दुज्ज्वलाः शोभना या गिरो वाणीः अकिरत् उच्चारयति स्म कीदृशा ईडिता स्तुता पुनः० अपीडिता न विद्यते पीडा यस्याः ना
सकाशात् सा पीडिता अतिपीडितेत्यर्थः उत्तमेनुत्तमं चस्यादितिवत् पुनः० विधुरिव सुहृन्निर्म्मलहृदयो नायकः

विधुसुहृद्विरहानलपीडिता विधुसुहृत्तरलानिलपीडिता श्रीराधान
विधुसुहृद्वदना[redacted]पीडिता विधुसुहृत्सुगिरो किरदीडिता ॥ २ कृष्णाय नमः
श्री लि, म, विधोः सुहृद्याः सुगिरः ।ऽ

श्रीकृष्णस्तस्य विरहानलेन वियोगाग्निना पीडिता विधुर्विश्लेषे चन्द्रमसीत्यमरः, यद्वा विधुसुहृदः कंदर्पस्य सं
बंधी यो विरहानलः तेन पीडिता यद्वा विधुरेव श्रीवत्सलाञ्छनेन एव सुहृत्तद्विरहानलेन पीडिता पुनः
कीदृशा विधुः सुहृत्सहायो यस्य स तादृशस्तेन तरलेन चंचलेन अनिलेन मलयानिलेन पीडिता दुःखि
ता विधुसुहृदा कामेन तरलेति पथकपदमेवेत्यर्थः ॥ २ ॥ श्रीकृष्णाय राधाय नमः

विधुर्विश्लेषे चन्द्रमसीत्यमरः

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

येष

किमुवाचेत्याह उदेति हे सखि शशी चंद्रः इमां हस्तनिर्देश्यां दिशं प्रति धावति उदयते उदितो भवति कमलवत्कोम।

७ ले सुन्दरे लोले चंचले विलोचने नेत्रे यस्य स तादृशं नायकं दयते दयां करोति येन मद्विरह्युपि स चंद्रोदये नायाति।

मां च करैरदयते अकारः प्रथकु निषेधार्थः अमानो नाप्रतिषेधे यद्वा मां च दयते हिनस्ति दयदानगतिहिंसागति

सादनेषु भ्वादिकः कीदृशैः करैः अकरैः अकस्य दुःखस्य रैः पावकैः अकं पापे च दुःखे चेति विश्वः रः पावके ती

क्ष्णे चेति विश्वः दुःखजनकत्वेन दारुजनकैरित्यर्थः पुनः तिमिरस्यांधकारस्य अकरैः अकारकैः तन्नाशकत्वा

रा॰ वि॰ टी॰ उदयते दयते दयते शशी सखि करैरकरैस्तिमिराकरैः ।

२ दिशमिमां चरमां चरमारमे कमलकोमललोलविलोचने ॥ ३

दित्यर्थः तिमिरमाः समंतात् कृशवंति हिंसंति ते श्रैथा तैरिति वा कृ अदि हिंसायाम् पचाद्यच् त्वं चर गच्छ त्वत्संनि

धिमपि न सरामीति भावः कीदृशी॰ नायकं रमायां लक्ष्म्यां रमते क्रीडते स तादृशो लक्ष्मीपतिरित्यर्थः य राम

द्वा ऽदयते ऽदयते इति च्छेदो मे एवं वीप्सात्वं रमारमे लक्ष्मीकांतं प्रति चर गच्छ तमानयेत्यर्थात् कीं॰ रमार २

मं कमले त्यादि अर्थस्तु पूर्वोक्त एव ३ राधाकृष्णाय नमः श्रीकृष्णाय कृष्णाय कृष्णाय

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

कुमुदेति हे सखि स हिमकरः प्रसिद्धः शीतकिरणः ईति निश्चयेन तां मतां प्रियसमात्मिधेऽभिमतां
हिमतां शीतलत्वमनुमामुद्दिश्य न सुतनुते ततः तनुते शरीरकार्श्यं मनोदौर्बल्यं च देतनुते का
र्श्यद्वयमित्यर्थः तनुते विस्तारयति कीदृशः कुमुदानामचेतनानां बंधुः अस्मदादीनां चाबंधुः शत्रुः।
अत एवाबंधुरः असुंदरः इदं विधोश्चंद्रस्य सदृशमुचितम् कीदृशीं मां सदृशं समानां प्रियसमागमत

कुमुदबंधुरैर्बंधुरैर्बंधुरः सुतनुतेतनुतेतनुतेततः हिमकरो हिमतां हिमतां नतां किमनुमां।
सदृशां सदृशं विधोः ४

विरहे च तुल्यरूपां दृक्कूपस्या तथा यदा ततो विस्तृतः यदा ततस्तां किं सदृशामिति व्याख्येयम् यद्वा हि
मकरः नतां नम्रीभूतां नम्रत्वेन ज्ञातां मामनु अहिमतामुष्णतां तनुते ततः किं विधोश्चंद्रस्य सदृशमु
चितं कीदृशः अतनुतेतः अतनुतया महत्त्वेन इतः नुताश्चासौ इश्च लक्ष्मीश्च तया ततो व्याप्तः नुतेततः
अतनुतेतश्चासौ नुतेतश्च सतथा महत्त्ववान् स्तुतलक्ष्मीवांश्चेत्यर्थः यद्वा कुमुदानां बंधुरः सुंदरो बंधुः
अपां जलानामंधुः कूपस्तं राति गृह्णाति सता यदा दृशा ज्ञानेन सहिता सदृक् दृक् ज्ञानेन ज्ञातरि त्रिविष्टपम

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

3

कमलिनीमिति हे सखि त्वं अनयोरनयोः श्रेष्ठयोरनयोर्नयनयोः कमलिनीं पद्मिनीं नयसि कः कं नयसि चेति प्रश्नः कीदृशीं
लतासु चलता तिचंचलेन अलिनालिना भ्रमरेण भ्रमरेण मलिनीमलं कृतं यस्यास्तादृशीं पाठांतरे मलिनश्चासा
वलिश्च मलिनालिस्तेन मलिनीं पुनः कीं॰ लतावत्सु स्फुटदीप्तिर्यस्यास्तादृशीं विधुभानुभिश्चंद्रकिरणैर्विधुतां कंपिता
मत एव विधुता चंचला आभा दीप्तिर्यस्यास्तादृशीं विधुतमामिति पाठे विधुतलक्ष्मीम् ५ सखीति हे सखि सरसी न विभाति न
शोभते यद्वा विभाति नयति विभाति न प्रतिशोभते कीदृशी विगतो भावो यस्याः सा विभाविनी विद्यमानत्वरहिता भाय

रा॰वि॰टी॰ कमलिनीं मलिनीं मलिनालिना विचलताचलता लताशुभां। विधुतभां विधुतां विधुभानुभिर्नयन योर
३ नयोर्नयसीनयोः ५ सखि विभाति विभाति विभाविनी न सरसी सरसा सरसा रसैः अलिकुले विधुता विधु
२। ताधुता विनदश्च मुखी विमुखी स्थिता।

स्याः तादृशी यद्वा सरसी न विभाति कीदृशी वीनां पक्षिणां भाभिः अतिविभाव्यमाना दीप्तिर्यस्याः सा तथा पुनः कीं॰
सरसा रसो गंधे रसो हर्षे रसः स्वादे प्रकीर्तितः तेन सगंधा सस्वादा वा पुनः॰ रसैर्जलैः सरसा परिपूर्णा पुनः॰ अलि राम
कुले विधुता के चिद्धु सरस हर्षमासरेति ते सरसा ससराः तादृशा ये सारसास्तैः सह अलिकुले विधुतेति माच देते ३
पुनः विधुतानि आईषत्स्फुतानि अत एव आसमंताद्विनमंति अज्ञानि कमलानी वमुखानि यस्यास्तादृशी तत्र रूपकं।
विमुखी स्थिता परा अनुखी नायके वैरस्पर्धः विधुताधुनेति पाठे चंद्रेण भर्त्सिता विगते श्रीकेते स्पर्धः ६ श्रीकृष्णायनमः

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

कुमुदिनीति अयं कुमुदिनीदयितः चंद्रः दयितो निताद्रूयितेन भर्त्रा कुनितारहिता निजकरैः स्वकिरणैर्दहति कीदृ
शः करैः अकरैः कैरोराजयग्राह्यो भागः सनास्ति येषां ते तैरित्यर्थः यद्यस्मात्कारणात् अयं विकचानि पु
ष्कराणि कमलानि यासु ताः विकचपुष्करिण्यः सरस्यस्ताः हरिणीदृशश्च तासां विपदे एकपदे युगपत् अभ
वदिति स्फुटं सूर्यसान्निध्ये सरसीस्थितकमलानां लीनतया तासां वि[illegible]जनकत्वं चंद्रस्येति स्फुटं सर्वप्रसिद्धमि
ति भावः ७ विधुरितेति विधुरितानां विरहिणीनां धरमिताः प्राप्ताः तादृशीर्वनिता ददृन्संतापयन्नयं विधुः।

कुमुदनीदयितोदयितोनितानिजकरैरकरैर्दहतिस्फुटं यदयमेकपदे विपदे भव[illegible]द्विकचपुष्करिणीहरि
वनि णीदृशः ७ विधुरिताधुरिता[illegible]तादृदृन्विधुरयं जनतो जनितोकभूत्तेरहमदक्षिणगतेक्षिणगते जनीर
विमति विमति निमिमील सा ८

जनितः जन्मनः सकाशात् जन्मप्रभृतीत्यर्थः अकभूत्कलं बीजनितः इदं अस्मिन् चंद्रे मदक्षिणगते मम द्वेष्ये।
क्षिणगते नेत्रविषये सति अब्जिनी कमलिनी रविमतिः हिमकरेप्यस्मिन् उष्णकर इति बुद्धिमती अतएव विमतिः
विरुद्धबुद्धिमती सा कमलिनी निमिमील मीलितवती अयं भावः चंद्रोदये कमलिनी संकोचं विदधाति ता
सां तापकत्वेनास्मिन् रविबुध्या संशयेन वाक्षिसंकोचमाचरितं भवेदक्षिणतो द्वेष्य इति दक्षिणावर्त्तः ८ राम

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

मलयेति मलयस्य मलयाद्रेः पश्चिमस्थाने ये नगाः वृक्षाः चंदना इति यावत् तेषु ये पन्नगाः नागास्तेषां मंडल्या
समूहेन कवलितो भक्षितः सन् अयं वनानिलः वनसंबंधी वायुः नु वितर्के वलितः कलति वलती काम
धेनुः आपतित इत्यर्थः यस्मात्कारणात् अदयं यथास्यादेव अंगानि मथ्नातीति अंगमन्मथः स अंगेषु
हस्तपादाद्यवयवेषु यस्मात्तादृशं मदंगं मम शरीरं भृशमुपन्सन् अयं दहति संतापयति यद्वा अंगेति संबु।
द्धौ हे सखि अंगानि मथ्नाति अंगमत् अंगमाश्रितः कत्तर्थिवायुः मदंगं दहति सर्पकवलं विना नु स्याशीतस्य

मलयपन्नगपन्नगमंडलीकवलितो वलितो नु वनानिलः अदयमंग[illegible]गमदंगं[illegible]दहति यद्भमय
भयमनुयम् ९ अयि रसालवनीनववनीरनी नवजीनवनीपवनी मतिं अलिकुलालिकुलालिकु
लाकुलां प्रति हिमाम हिमाम हिमा हिमा १०

रा॰वि॰ ४

वने वायोः कुतः संतापकत्वमिति भावः ९ अयीति अयि कोमलालापे अयि सखि रसालानां आम्राणां वनी मां प्रति अहि
ताशत्रुभूत्वा दुःखदायिनीत्यर्थः कीदृशी नववनीरनी नवं च तन्नीरं च तेन नयति प्रतिवृक्षं प्रापयति सा नववनीरनी सर
णीमत्वादिति पु॰ नवानां नूतनानां नीपानां कदंबानां च भ्रामयति बुद्धिमनवनी अरक्षणी तिरस्करणीत्यर्थः पु॰ अ
लिकुलालिकुलालिकुलाकुला अलिकुलानां भ्रमर[redacted] समूहानां आलिकुलानां समूहानां इयानि आलि
कुलानि सर्वाः समूहोत्करा कुलाव्याप्ताः पु॰ महिमा हिता महिम्नातिमहत्वेन अहिता कृताधानामा शत्रुवन्नीत्स

राम ४

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

बकुलमिति हे आलि हे सखि त्वं तु बकुलं शशात तत्प्रतिभूतं गत्पा गच्छे त्यर्थः की० बकुलं परागाविघं ते यस्मिंस्त
त्तथा परागि पुनः ० की० भ्रमरंकर परागाः पुष्पधूलेयश्च तत्र परा अगेषु वृक्षेषु परा ते तादृशाः एतादृशो
ये ऽलयो भ्रमरास्तै राकुलं व्याप्तमित्यर्थः पाठांतरे परापतंतः भफपिवंतः तादृशाः रागेषु परागुंजंत
इति यावत् तादृशा अगेषु वृक्षेषु परापेलया तैराकुलमित्यर्थः पुनः ० विशदशारदशारदशारदंवि
पादो मलं निर्मलो यः शारदः शरदि भवः अर्थात् चंद्र इति यावत् सशारं भावप्रधाननिर्देशो नवलतं ददातिस

बकुलमाकुलमालिपरागितं भ्रमकपरागपरागपरालिभिः विशदशारदशारदशारदं शशकं
लंककलंककलंकितम् १९

दृशो दशोयस्मिंस्ता दृशः शं सुखं अरमतिशये न ददाति शारदः विशद शारदशारदश्चासौ शारदश्च
सता दृश स्तं पुनः ० की० कलंकस्य चंद्रलांछनस्य कलं केन संबंधेन च कलंकितं श्यामलमित्यर्थः पु
धाविगतशंयस्याः तादृशी यासांताः ददाति तत्तथा शम् आसमंतात् रमति लाति सा शाराश्चारा चासौ
दृशा च तां राति ददाति तान्दयति रूपयति तत्तथोक्तम् ततो विशेषसमासः वियोगि दुःखदं संयोगिसुख
दं चेत्यर्थः शशकलंकस्येव कलास्वरूप यत्तथोक्तं मृगांकमूर्तितुल्यमित्यर्थः पुनः ० की० केनेवाधुना
कलंकितमाशोलितम् २२

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ग

एवमुक्ता सखी राधां प्रतिवदति नवमिति हे ऽशोकदेवा शोकं द्यति खंडयति सा शोकदा न तादृशी अशो
कदा तस्याः संबुद्धौ हे सखि त्वं नवं नूतनमशोकं न विद्यते शोको यस्मिन्स तादृशः तत्तथा तन्नाम वृक्षं स
माश्रय तन्निकटवर्त्तिनी भवेति भावः कीदृशमशोकम् सुरभितारभितारभितारतम् सुरभितया सौ
रभ्येण रभितारभसंयुक्ता वेगवंतो एवंविधयुक्ता वायेऽलयस्ते आरतेन क्रीडितेन अईषद्रते यत्र तत्तथा

5
त्तौकौव्यत्तौ

नवमशोकमशोकमंशोकदे सुरभितारभितारभितारतम् सखि समाश्रय मामाश्र
यमाश्रयः कमलिनीमलिनीमलिनीय इवागतः १२ श्रीकृष्णायनमः

रा॰ वि॰ टी॰
६५

रभराभस्य इति धातोरितप्रत्ययांतस्य रभिता इति रूपं रभसो वेगहर्षयोरिति विश्वः यद्वा सुरभि
तासौरभयुक्ता आसमन्तात् रस्याग्रे भ्रमिभासंजाताये बांतेतथा ये ऽलयस्तद्रते आरतमास
क्तमा इति माश्रय आश्रिता भवमद्वचनं कुर्वित्यर्थः माश्रयः मायः लक्ष्म्याः आश्रयः लक्ष्मीपति
आगतः आगतप्रायः कः कमिव अलिनीयः कमलिनीमिव अलिनीभ्रमरी याति स तादृशः १२

राम
५ ...

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

अस्मिता असेः खड्गस्येवमतं यस्याः सा असितिविच्छेदकर्त्रीत्यर्थः न १ त्रुटिः

सखीति त्वं हिताम द्धितकारिणी असि असि अतोसत्तासिद्धित्वेनाभिमतासीत्यर्थः कीदृशी त्वं अम
शोकं अशोकस्य पल्लववपुष्पादि अशोक दंशोकाभावदमिति न विद्यते शोको विचारविषयो यत्र ता
दृशाइतिमां आह ब्रवीति अथेति यावेब्रवीषि काकाग्रस्मः पर्यवस्यति तत्र इत्यस्मिन् विषये मा

सखि हितासि मतासि मताहिमां नवमशोकमशोकमशोकदाम्
म = तद्धितमामवमाममामममांव्रज हरिंनवनीरदनीरदम्, १ १२

मव रक्त अममान्यूनतया अममाममेति संबंधभक्त्यांमा किमित्यर्थः तादृशीमांगत्वेति शेषः
हरिं व्रज तं प्रतिगच्छेत्यर्थः कीदृशं हरिं नवनीरदनीरदं नवनीरं जलं ददाति स तादृशो नीरसो
मेघः तं तथा स जलजलदनीलमित्यर्थः रूपकालंकारः १२ श्रीकृष्णाय मनोहराय नमः

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

6

रा· वि· टी·

इतीति इति पूर्वोक्तिप्रकारेण सख्या राधया गदिता उक्ता मदोरोगपीडाविशेष इति यावत् सजातीयस्या:
सा गदिता पीडिते त्यर्थ: विष्णुभ्रांतरिरोगे च गदः शास्त्रांतरे गदेति विश्व: तादृशी सती कलया चातुर्यवि
शेषेण इतिवत्स्यमाणप्रकारेण गिरम् अदित दत्तवती की० गिरं अवराय अधमाय वराय श्रेष्ठाय वा शब्
देन अवनरत्वरांतदभावेन रूपावकरूपा कीदृशी कलया कांत्या कला गंभीरा तदिति शायवती त्यर्थ:
पुन:० की० पटुगिराया: पूर्वोक्ता या समर्थवाएया: मृदुतया कोमलया अमृदुतया कठोरतया चवहूता।

इति सखीं गदितां गदहीनां दित्तामिव नराय नरायं वराय वा इति गिरं कल
या कलया कलां पटुगिरां मृदुतां मृदुतां दुतां १४ श्रीकृष्णायनम: हरि:

नापूषिता अनवस्येति पाठे कलानम्रीसखी इति पूर्वोक्तेन प्रकारेण सख्या राधया गदिता सती अनव:
पुरातनो यो नर: पुरुष: पुराणपुरुषो हरि: तस्मै इति वक्ष्यमाणां गिरं पटु यथा स्यात्तथा अदित दत्तवती राम
कुया गिरा कथंभूतया मृदुता मार्दवं अमृदुता कठोरत्वं ताभ्यां दुनाति सा मृदुता मृदुता दुत्ततया पुन:०
की० कलया गंभीरया पुन: की० कलया कं सुखं लाति सुखदायिन्या पुन:० की० वराया वैरो वरश्चासा
वायश्च तेन वर: श्रेष्ठ: तस्मै वा शब्द: उपमार्थे गदितेव १४ २ ॥

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

किमुवाचेत्याह।

समुदिते मुदि
ते मुदिते हा ए

मलयजमिति हे दरे ते सहचरी सखी राधा तनौ शरीरे तनुस्व मलयजं तनुते विस्तारयति नलिनी तन्वा।
न्नी सखीन लिनीदलं तनुते सा सुनयनात न्नामा सखी अनलं संतापं यति खण्डयति सा तथा तं नलदं उशी।
रं तनुते तदपि तथापि सा सीदति दुःखिता भवति वं फता वं फसम् रहस्य दुःखितो भवति यथा सीदति इत्या
दरेवी सा १५ पुनः किमुवाचेत्याह समुदित इति हेईश्वर ईलि क्ष्मी कासा वर हे लक्ष्मी कांत सा राधा हि
मकरे समुदिते अमुदिता अहृष्टा सती ईक्षणे नेत्रे अमुदिते अहृष्टे मुदिते इति यावत् एति प्राप्नोति वाश

· मलयजं तनुते तं नुते तनौ सहचरी नलिनी नलिनी दलं सुनयना नं नलदं नलदं च सा तं दपि सी
दति सीदति वं फता १५ समुदिते मुदिते मुदिते ते दिए हि करे मकरे मकरे ऋति पिकरवे वृरवे वरवैति '
म२ सा हरिण छा २ लांछन लांछन लांछना १६ । । न । ३ । । । प
दृष्टार्थे चेत् परं पिकरवे कोकिलस्वने मुदिते ऋति कर्णे अमुदिते एति अंगुल्या छिना पिदधातीति भावः
कीं हिमकरे मकरे मकरेन स्यमकरस्वामिनः मकरध्वजस्य करे कारके तद्धके इत्यर्थः मकराणामिन्दं
स्य यादेनाथ्यस्य कं सुखं लाति तथा तस्यापि जलवृद्धिकर इत्यर्थः अवमां रक्षेति रवः श बोध्यस्या सा हि
परिपांडुरेत्यर्थः यद्वा हरिणलांछन श्वंशो लांछनं यस्य सच्छिवो लांछनो यस्या तथा छिव छिवेति जय हि

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

पुनः किमुवाचेत्याह १

ग

हे अयोगहत अयसो लोहस्यायोभाः पर्वतस्तद्वत् हृदयं यस्य सः तथा तस्य संबोधने हे अयोहृत् कठोरांतःकर
णसा ते सखी तु वसहे चरीरधात तव वियोगं विरहवेगं रुजस्य योगं अन्यत्रगमनसाधनीभूतं न सहते आ
यदा २ दूरे वीक्ष्या तव योगमत्यंत योगं असा विक्षोस्तव योगं वा तथा अयोगं इति त हत् अयोगहृत् वियोगापहारकः
संयोगजनक इति यावत् तत्सहते भवानित्यध्याहार्यं तथा च भगवान् तां तरुणीं स पदि किरतु त्यज वु यत्र
7 यस्या मभिरमस्मि तां परिहरत्वितर्थः तां सरणीं मार्गं किरतु नामेति निश्चयेन ननी विजन्न तननी वो जातव
नसहते सहते सहते सखी तव वियोगं वियोगं मेयोगहृत् सपदि तां तरुणीं [illegible] णीं मणीं किरतु नाम सरणीं ४
रा॰ वि॰ टी॰ नवं नवनीविनं १८ अथ तत्याकलया कलयाम्बुभां तनजड्डामजड्डामजदीप्तिमान् हरित्गात्तम
७ व्य॥ गात्तमगाच्छे सामुदमतीममतीवदृशोस्थितं १९
तमानमिति यावत् मणिं किरतु नीवी विमोहोदिधात्वित्यर्थः कीदृशीं मणिं नवम् १८ अथेति अथेतत्न
तरं वनजानां कमलानां दाम पंक्तिस्तस्या जातं यद्दाममालातज्जाया दीप्तिस्तद्वान् हरिस्तयाकलयातत्
न्नाम्न्या सख्या सह अम्बुभां सुंदरीं राधां प्रति अगात् कीं कं सुखं लाति सा कला तया सा तां अगात्तं अगो
गोवर्द्धनः स आत्तो येन तं तथा दृशो स्थितं दृष्टिगोचरं सतं अतीवं मुदमगात् कीं अतीवसौम्यमित्यर्थः १९
७ राम

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

अथेदं हरिहरभाष्ये अत्राचार्येणयद्यपि गोपशुरुक्तस्तथापि अस्वर्ग्यं लोकविद्विष्टं धर्ममप्याचरेन्नत्विति स्मरणात् तथा देवरेण सु
तोत्पत्तिर्वानप्रस्थाश्रमग्रहः दत्तायाश्चैवकन्यायाः पुनर्दानं परस्य च समुद्रयानस्वीकारः कमंडलुविधारणं महाप्रस्था
नगमनं गोपशुश्च सुराग्रहः अग्निहोत्रहवण्याश्च लेहो लीढापरिग्रहः असवर्णासु कन्यासु विवाहश्च द्विजातिषु वृत्तस्वा
ध्यायसापेक्षमघसंकोचनं तथा अस्थिसंचयनादूर्ध्वमंगस्पर्शनमेव च प्रायश्चित्तविधानं च विप्राणां मरणान्तिकं संसर्ग
धःतथो दोषः पापेषु मधुपर्के पशोर्वधः दत्तौरसेतरेषां तु पुत्रत्वेन परिग्रहः शामित्रं चैव विप्राणां सोमविक्रयणं तथा दीर्घकालं
ब्रह्मचर्यं नरमेधाश्वमेधकौ कलौ युगे त्विमान्धर्मान्वर्ज्यानाहुर्मनीषिण इति च स्मरणात्

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

रामचंद्रेति॰ राधिकाया हृदयशोकं घातिखंडयति तस्माद्दृशम्दः काव्यं कविना पंडितेन रामचंद्र
कविना आसीत्तेनोत्पादितमित्यर्थः कीं॰ पुरुषोत्तमस्य यः सुतो जनार्दनस्तस्यैतेन श्रेष्ठेन सु
४ तेन ज्येष्ठपुत्रेणेत्यर्थः कीदृशमदः आरात्समीपे कृतमात्रमित्यर्थः राधिकाया हृद

रामचंद्रकविना कविनांदः पुरुषोत्तमसुतेन सुतेनं राधिका हृदयशोकदंमांसी
रा॰वि॰टी॰ ८ त् राधिका हृदयशोकदम्मोरात् २० इति राधिकाहृदयशोकदारुणं काव्यम्

येयस्य सततया श्रीकृष्ण इति यावत् तस्य यः शोकस्तत्प्राप्तिनिबंधनं यद्दुःखं तद्घातिखंडय
ति तस्माद्दृशम् २० राधाविनोदकाव्यस्य व्याख्यानस्वधियाम्यधात् परोपकाररसिकाः शोध राम ८
यंतु तत्सादरात् २१ इति श्रीनारायणबुधविरचिता राधाविनोदकाव्यटीका समाप्ता ॥ कल्ल

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative